प्रवेश सं० ३-८१५८

विषय: वेद

क्रम सं०

नाम निर्हरण सूक्तगण व्याख्या

ग्रन्थकार

पत्र सं० ८-१५

श्लोक सं०

अक्षर सं० (पंक्ति) ४३

पंक्ति सं० (पृष्ठे) ८

आकार ८.७ x ४.३.

लिपि: दे. ना.

आधार: ३७ .

वि० विवरण

सी० एस० यू० पी०—७६ एस० सी० ई०—१६४१—५०,०००

ना - १२/४२

004256

Indira Gandhi National Centre for the Arts

मवस्यघघ्नीचेतियास्कः। घोररूपे अतिक्रूररूपे विषमरूपे नानारूपे अविनाशिनि विनाशरहिते। ई दशि हे
कृत्ये त्वं जंभिता आलस्ययुक्ता सती आयासलेशरहिता सती स्वयं अद्भुतं अभूतं भूतरहितं पंचमहाभूतरहितं
मतं तव कर्त्तारं स्वयमादाय गृहीत्वा प्रतिगम्यण स्वप्रतिगृह्णीष्व॥ मस्यये स्वर्थे॥ इति॥ २६॥ त्वमिंद्रो यमो वरुण
स्त्वमापोऽग्नि रथानिलः त्वं ब्रह्मा चैव रुद्रश्च त्वष्टा चैव प्रजापतिः॥ इति॥ २७॥ इयं कृत्यायाः स्तुतिरिति स्पष्टा। हे कृ
त्ये त्वं इंद्र इत्यादि। अनिलशब्देन वायुः। त्वष्टृशब्देन सूर्यः। त्वष्टा तूर्णमश्नुत इति नैरुक्ता इति निरुक्तितो विष्णुर्वा। प्रजा
पतिर्दक्षप्रजापतिरिति॥ २७॥ — आवर्तध्वं निवर्तध्वमृतवः परिवत्सराः अहोरात्राश्चाप्याश्च दिशः सप्रदिशाश्च
मे॥ इति॥ २८॥ अनया कृत्यागमस्तुः कृत्याप्रतिमोचनाय देशकारनिरिक्षोऽपि प्रार्थयते। हे कृतकर्मे मम कृत्यागमस्तस्य कृ
त्याप्रतिमोचनाय आवर्तध्वं आभिमुखीभूय वर्तध्वं। अत एव निवर्तध्वं। अस्मात्स्थानात् निवर्ताभवत। एवं परिवत्स
राः मे आवर्तध्वं निवर्तध्वं। परिवत्सरशब्देन अयने उच्येते। अब्दशब्दस्य पर्यायपाठात्। एवं अहोरात्राः आ वर्तध्वं

Indira Gandhi National
Centre for the Arts

निवर्तध्वं। एवं अब्दाश्च-अब्दशब्देन संवत्सरा उच्यंते। एवं दंदिशः-पूर्वादयः प्रसिद्धाः। दिदिशश्च विदिक्शब्देन
८ आग्नेयादिदिशा उच्यंते॥ इति॥२८॥ त्वं यमं वरुणं सोमं त्वमापोग्निमथानिलं॥ अत्र हृत्सपश्नश्लेषे वमुत्पादयसि चाद्भु
तं॥ इति॥२९॥ हे कृत्ये त्वं यमं वरुणं सोमं एतान् नधा त्वं ॰मेव आपः अपः जलं अग्निं अपि अनिलं वायुं एतांश्च एतानपि अ
स्माकं गरु हे आत्मत्व आनीयस्त्वापथिता अस्मान्प्रतिपश्रूनुत्पादयसि शीघ्रमेव गवादिपशुवत् अतिवश्यान् उत्पादयिष्यसि·
जनयिष्यसि करिष्यसि। किंच· अद्भुतं चित्रभूतं यत्कदापि न भूतं न संपन्नं तदपि इत्थमेव असंभावितमप्यस्माकम
भिलषितं पदार्थमुत्पादयसि· उत्पादयिष्यसि। शीघ्रमेव जनयिष्यसि॥२९॥ येमे द्रोगे रारुगर्भे रायानं धियासहि
त्वं पुरुषं निजद्रुहः॥ कुंभीपाकं नरकं जनाग्नी त्वं वद्भा अहरहर्यएवं पुरुषाः सो यमस्य॥ इति॥३०॥ अत्र कृत्या विशेषण
त्वेनयत् त्वरे अध्याहृत्य व्याख्येयं॥ ततत्रैवाग्नेस्त्व ष्टंभविष्यति। येयमस्य पुरुषाः सः धर्मराजस्य पुरुषाश्चित्रगु रामः ८
माद्यः मम रारुगर्भे काष्ठ गर्भे नानाविधतक्षणादि संस्कारसंस्कृतानि सौंदर्योपेत काष्ठ रचिते द्मेगरु हे रायानं पा

शे प्रसार्य स्वपंतं अतिशयेन चिंतालेशरहितं· अतः एव धियाय जनन्या जननादि पद्धि धकर्मणा सहितं पुरुषं
पुरुषापत्यं पुत्रपौत्रादिकं निजद्रुहः निजशत्रून् हन हत्वा तः कृत्या जनिनमर लोनरं· नरकं कुंभीपाकं कुंभीपाकाभि
धं नरकविशेषं निजद्रुहः नेयमस्य पुरुषाः सः पुरुषाः हे कृत्ये यात्वं जनाग्नी जनाग्न्या सर्वजननाम्ना सर्वजनपूज्या
अतिश्लेष्मानया अहरहः प्रतिदिनं नेव ह्रा एवं इत्थं नव अलौकिकं सामर्थ्यमिति शेषः॥ पुरुषं कुंभीपाकं नर
कं च निजद्रुहिति मानसमयेन संभावनामात्रं न तेन तत्संपन्नं यद्वा अत्यन्तप्रारब्धतः संपन्नं वाहं यमिति॥२७॥
अभ्यक्ताक्तास्त्वं कृता सर्वं नो दुरितं वहजानीथाश्चेव कृत्यानां शत्रून्स्यापचेतसः॥ इति॥२९॥ हे कृत्ये त्वं अभ्यक्ता
अभ्यक्ता आभि अस्मान अभिमुखीभूय अक्ता व्यक्ता स्पष्टा सती· अंजूल्या केहूक्षणकांतिगति उपहितः तथा आक्ता·
आअर्वाक्· आरात्सर्वांगर्थे इति यास्कः। अस्मदभिमुखीभूता सती अक्ता स्पष्टा व्यक्ता विशेषः न तत्पर्यतः पूर्वस्मा
नमुक्तस्येवार्थस्य पुनरुक्तिर्भूयस्त्वार्थमिति यास्कः। अभ्या संभूयांसमर्थं मन्यंते ः पथाः हे दर्शनीयाः हे दर्शनीये



Indira Gandhi National Centre for the Arts

भूचितवान्॥ तथा स्वलंकृता सुष्टु अलंकृता कर्णभूषणकुंडलाद्यलंकारभूषिता ईदृश्यपि सती त्वं नोऽस्माकं सर्वं
९ दुरितं त्वज्जनितं दुःखप्रदं दुरदृष्टं वहयप्रवाहयनाशायेत्यर्थः॥ उत्तरार्धे कल्हनिरध्याहारः॥ हे कृत्ये त्वं कृत्या
नां कर्तॄन् शत्रून् पापचेतसः पापांतःकरणान्येव जानीथाः अजानीहि च ज्ञाता च तान्नाशयेति भावः॥ १३॥ यथा
हंति पुरासीनं तथैवैषा सुकृत्वरः तथा त्वया युजा वयं तस्य निकृत्वरस्य स्युर्जंगमम्॥ इति॥ १२॥ हे कृत्ये यथा आसी
नं उपविश्य तिष्ठंतं निरुद्धमं पुरुषं पुरा पुराणं प्रस्कृतं प्रारब्धं दुरदृष्टं कर्तृभूतं सत् हंति दारिद्र्यादिना पीडयति॥
अयमर्थश्च॥ आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः॥ शेते निपद्यमानस्य चराति चरतो भगः इत्यादिश्रुतिषु
प्रसिद्धः॥ तथैव सुकृत् शोभनकर्मकृत् पुण्यकृत्वरः इषा शरेण हंति शत्रुमिति शेषः॥ तथा हे कृत्ये त्वया युजा यु
क्तया सयुक्तया हेतुभूतया वयं तस्य नवकर्तुः शत्रोः स्थास्नुस्थावरं जंगमं जंगममपि निकृत्वनः नाशयाम इति॥ राम०
॥१३॥ उत्तिष्ठैव परेहीतोऽज्ञातेव किमिहेच्छसि॥ ग्रीवास्ते कृत्ये पादौ चापि कृत्स्यामि निर्द्रव॥ इति॥ १४॥ हे कृत्ये ९

त्वं अज्ञातेव सती इतोऽस्मदीयात्स्थानात् उत्तिष्ठैव॥ उत्थाय च परेहि पराङ्मुखी भूय गच्छ॥ इह स्थिता किं क
र्तुमिच्छसि॥ इह स्थिता अस्मदीयमनिष्टं त्वया कर्तुमशक्यमित्यर्थः॥ अपि च यदि मदीयमुक्तं न करिष्यसि
तर्हि हे कृत्ये ते तव ग्रीवां पादौ च अभिकृत्स्यामि॥ अभिमुखीभूय कर्तयिष्यामि॥ अतो निर्द्रव पलायस्वास्मा
त्स्थानात्॥ इति॥ १३॥ स्वायसाः संति नो असयो विद्मश्चैव परूंषि ते॥ तैस्तेनि कृत्स्यामस्तुग्ने यदि नो जीवयस्य
रीन्॥ इति॥ १४॥ हे कृत्ये नोऽस्माकं गृहे इति शेषः॥ स्वायसाः अयःशब्देन लोहं तत्संबंधिनः आयसाः सुष्टु
आयसाः स्वायसाः॥ अत्यन्तमलोहघटिता इत्यर्थः॥ ईदृशाः असयः॥ अस्यंति क्षिपंति छित्वा अतिदूरे शत्रूनित्यसयः
खड्गाः संति विद्यंते॥ हे कृत्ये तव परूंषि च पर्वाण्यपि अस्थ्यादिसंधिरूपाणि विद्मश्चैव जानीमः॥ ज्ञात्वा च
हे कृत्ये ते रस्मिभिस्तैः तव तानि पर्वाणि निकृत्स्यामः नितरां छेत्स्यामः॥ हे उग्ने अति क्रूरे कृत्ये यदि नोऽस्माकमरीन् शत्रून्
जीवयसि जीवयिष्यसि॥ तस्मान्न चेत्तैस्तव तानि निकृत्स्य इति॥ १४॥ मा स्तोऽधि पोदि पदं मा चकिंचित्तनुष्पदं॥ मा

Indira Gandhi National Centre for the Arts

ज्ञातीनगुज्ञानस्वास्मावेशि प्रतिवेशि प्रतिवेशिनौ॥ इति॥२४॥ हे कृत्ये अस्य शत्रोः द्विपदं खगरुवर्तिनं द्वि
१० पदं शुकं पुत्रादिकं मा उच्छिषः मेवउच्छि अवशिष्टं कार्षाः। तथा अस्य किंचित् किंचिदपि चतुष्पदं गवा
दिकं मोच्छिषः प्राप्यतत्॥ एवं पूर्वार्द्धेन सामान्यतः अस्यादि पदं च मोच्छिष इत्युक्त्वा उत्तरार्द्धेन विशेषत आह। तथा
हि। मा ज्ञातीन् अस्य ज्ञातीन् सपिंडान् मोच्छिषः। मा ज्ञातीन् इत्यत्र विसामान्यत उक्ता परमत्र मास्य दान् विशेषत आ
ह। अश्वानिति। अश्वान् मोच्छिषः। अथ यत्किंचित्संबंधि द्विपदं चतुर्थपादेन विशेषत आह। मावेशि प्रतिवेशिना
विति। अस्य वेशिप्रतिवेशिनौ मोच्छिषः। विशति प्रविशति संबंधेन अस्य गृहे स लोवेशी· पितृष्वसेयमातृष्व
ते यमातुलेयादि सर्वोपि संबंधी वेशिशब्देन ज्ञेयः। प्रतिशब्दोऽभिकटे स्थित्वा अस्य गृहे इति प्रतिवेशी सर्वोपि प्रतिवे
शिवर्गः। एवमस्या ऋचोर्थः पाठस्तु यथामति लिखितः। पश्चात् त्वं ईश्वरो वेद इति॥२५॥ शत्रूयता प्रहितासि मां ये राम·
नाभियापायतः॥ ततस्त्वपातालगुरुतुयो यमं नर्मक्षिप्तः॥ इति॥२६॥ हे कृत्ये त्वं येन शत्रूयता शत्रुवदाचर तिरा १०

५

त्रूयति शत्रूयता त्रूयतः तेन शत्रूयता शत्रुवदाचरता मां तिप्रहितासि अभिमुखीभूय प्रेषितासि यथा येन प्रकारेण
यतो यस्मात् स्थानात् तथा तेनैव प्रकारेण ततस्तस्मिन्नेव स्थाने यो यं सर्वजनप्रत्यक्षः परमात्मा सर्वजीवनियंता
मयि अंतः हृदयाकाशे स्थितः स्थितः हे कृत्ये स तात्त्वां गुरुतु प्रेरयतु॥ इति॥२६॥ एवं त्वं निकृत्ता स्वाभिर्ब्रह्मणा देवि स
र्वशः यथेत माम्भिनागत्वा पापधीनिवृनो जहि॥ इति॥२७॥ हे देवि घोत्तमाने स्वतेजसा दीप्यमाने हे कृत्ये एवमनेन प्र
कारेण अस्माभिर्ब्रह्मणा मंत्रेणानेन मंत्रप्रयोगेण त्वं सर्वशः सर्वे यदि हस्तपादादि यव यवे युभिकृता छिन्ना सती
यथेतं यथागतं स्थाने गत्वा तस्थानं आश्रित्य स्वं द्रष्टुं आश्रिता सती नोऽस्माञ्जहि त्यज। काः निवृ· पापधीनि वा पापं
दधाति धारयति प्रायश्चित्ताद्याचरणं विना स्वात्मवशे स्थापयंति ते पापधियः पापधारकाः अतिनास्तिकजनास्तानिव·
यथा वेदिकजनान् त्यजति तथेत्यर्थ इति॥२७॥ यथा विशुद्धतो वृक्ष आमूलादनुशुष्यति॥ एवं स प्रतिशुष्यतु यो मे पा
पं चिकीर्षति॥ इति॥२८॥ यथा येन प्रकारेण विशुद्धतः विशुद्धिं सितो वृक्षो श्वत्थादिः आमूलात् मूलमभिव्याप्य अनुशु
×मामेना तं यचिकीर्षति×

Indira Gandhi National
Centre for the Arts

ष्यति अनुक्रमेण प्रतिश्रुत्क्षोभो भवति एवमनेन प्रकारेण मेमस्त्वं मर्त्य पापं कृत्यारूपं चिकीर्षति कर्तुमिच्छति यः पुरुषः स प्रति
११ श्रुष्यतु स्वयमेव प्रतिक्षोभ वतु याः काश्चित् स्त्री वा मे पापं चिकीर्षति सापि प्रतिश्रुष्यत्विति लिंगविपरिण
मइति ॥३८॥ यथा प्रतिश्रुत्कोभूत्वा तमेव प्रतिधावति ॥ पापं तमेव धावतु यो मे पापं चिकीर्षति यामे पापं चिकी
र्षति ॥ इति ॥३९॥ यथा प्रतिश्रुत्कः सन्मुखवर्ती अपरः श्रुत्को भूत्वा पुनः पुनः प्रतिशब्दं कुर्वाणः तमेव शब्दं कु
र्वाणमेव श्रुत्कं तं प्रतिधावति एवं यो मे यामे चिकीर्षति यामे पापं चिकीर्षतीति प्राग्वत् । पापं कृत्यारूपं पा
पं कर्तृभूतं तमेव कृत्याकारिणं पुरुषं तामेव कृत्याकारिणीं स्त्रियं धावतिति ॥३९॥ योनः स्वो अरणो यश्च
२ निष्ट्यो जिघांसति ॥ देवास्तं सर्वे धूर्वंतु ब्रह्म वर्म ममांतरं ॥ इति ॥४०॥ स्वः स्वीयो भ्रातृव्यादिः अरणो रम.
रणरहितः संग्रामरहितो भूत्वा जिघांसति हंतुमिच्छति । यश्च यो पि निष्ट्यः स्वे स्थे शत्रुसंघात पोःनिरं ११
तरं स्थापयति शब्दायते । त्वं मया हतस्त्वं मया हंतव्यः त्वं मतस्त्वं मरिष्यसि तव शिरश्छिन्नं तव शिरश्छे

२

स्यामि इत्येवमादिपूर्वकं स रणकर्ता संग्रामकर्ता सर्वे अग्नीन्द्रादित्यप्रभृतयो देवास्तं धूर्वंतु हिंसंतु । यतो मम
ब्रह्म मंत्ररूपं शब्दब्रह्म अंतरं अंतर्वर्ति शरीरमध्यवर्ति मे मम कवचं रक्षकं सन्नुवरी वर्ति इति ॥४०॥ अपश्
ब्रह्म मंत्ररूपं ... अंजने । ये मे केशान् खे कुर्युः रंजने रंतधावने ॥४१॥ प्रतिसर प्रतिधावकु
गमं यो मे करोति प्रहारे योगारे योनि वेशने । ये मे केशान खे कुर्युः रंजने रंतधावने ॥४१॥ प्रतिसर प्रतिधावकु म
मारइव पितृगृहान् ॥ मूर्द्धानमेषां स्फोटय पदमेषां कुले जहि ॥४२॥ हे कृत्ये यः कृत्याकारी शत्रुः मे मम प्रहारे प्रह
ष्टं हारं प्रहारं तस्मिन् प्रहारे प्रहृष्टे अनंतधनचयरचिते दर्शनादेव जगद्व्यामोहके । अतिसौंदर्यचिते हारे करोति ।
त्वामिति शेषः । सर्वत्र तथा यः अगारे गृहे त्वां करोति । तथा योनिवेशने निरंतर विशत्यस्मिन्निति निवेश
४ नं उपवेशनं शयनादिस्थानं तस्मिन्निवेशने उपवेशनशयनादिस्थाने त्वां करोति तथा ये कृत्याकारिणः शत्र
वः ये मम केशान् खे केशाश्चनरत्वानि चते पां समाहारः केशानखं तस्मिन् केशनखे केशेषु नखेषु च तथा अंज
ने अक्ष्णोः कज्जले तथा रंतधावने दंतशोधने हे कृत्ये त्वां कुर्युः एषां पूर्वोक्तानां सर्वेषामपि कृत्याकारिणां मूर्द्धानं

Indira Gandhi National
Centre for the Arts

शिरः स्फोटय अवयवशो विदारय हे कृत्ये एषां कुले प्रसिद्धे कुले वा यद्वा कुले गृहे हे कृत्ये त्वं परं स्वीयं पदं
१२ जहि त्यज स्वस्थानं प्राप्य तेषां गृहे कुले वा त्वं सर्वदा तिष्ठेत्यर्थः॥ अथ द्वितीयस्या ऋचोर्थः॥ तत्र पितृगृहानिस
तः समस्तात् पदात् गृहानिति व्यस्तं कृत्वा पुनर्योजनं तथैव व्याख्यास्यामः हे प्रतिसर एषां गृहान् प्रतिधाव
कः कानिव पितृगृहान् कुमार इव इति इदं अन्वयः पूर्वार्धर्चस्य अथ प्रत्यक्षरं व्याख्या हे प्रतिसर प्रतिसरश
ब्देन गले निक्षिप्त ... सूत्रदोरकस्य सौमसूत्रदोरकस्येवा पादद्वयं प्रतिसरणशीलः पादद्वयं पर्य
न्तं लंबमानः पूर्वोक्तसूत्रस्य व्रीहियवाद्यन्यतमो मणिरेव गृह्यते रक्तं कृष्णमाविकं सौमं वास्त्रि मणिं प्रतिसं
रं ज्ञात योऽस्याव ध्रुंति नीललोहितमिति शांखायनसूत्रे दर्शनात् तेन प्रतिसरशब्देन रात्तुव धार्यं निर्मितं
स्त्याकारकृत्याशब्दवाच्यः पुत्तलिकाविशेषः गलस्य पादान्तावलंबी दोरकस्य व्रीहियवादिर्मणिरेव नि रा.म.
क्षीयते यद्वा विद्वज्जनैर्विशेषतः प्रोक्तः शांखायनसूत्रवत् अन्यसूत्रपुराणादिविहितो जिज्ञास्यः सा १२

प्रदायिकास्तु प्रतिसरशब्देन शरपुंखीदाणपणास्यपि सैव उत्तानपर्ण्या पि सैव सपत्नी बाधनी सूक्ते इमां खना
म्योषधिमित्यादिके परिपठिता यस्याः पर्णोच्छिद्यमानो तुल्यं खंडद्वयेन भवत्येव एकं शरसकारं भवति अ
परं शरपुंखाकारं प्रतिसरशब्देन सैव शरपुंखी गृह्यते इति संप्रदायः पश्चाद्धर्मरहस्यमीश्वरो वेदाय
द्वा येन कृत्या कृता तं प्रतिसरतीति व्युत्पत्त्या प्रतिसरशब्देन बलगशब्दवाच्यः कृत्याविशेषण वोच्यते तेन
हे प्रतिसर कृत्याकारिणं प्रतिसरणशील कृत्याविशेष हे बलग एषां कृत्याकारिणां गृहान् प्रतिधाव कः कानिव
पितृगृहान् कुमार इव कुमारो यथा पितृगृहान् प्रतिधावति तथेत्यर्थः॥ तदनु किं कर्त्तव्यमित्याह एतेषां पूर्वो
क्तानां सर्वेषामपि कृत्याकारिणां मूर्द्धानं शिरः स्फोटय अवयवशो विदारय हे बलगशब्दवाच्ये कृत्ये एषां कुले प्र
सिद्धे कुले वा यद्वा कुले गृहे हे बलगशब्दवाच्ये कृत्ये त्वं परं स्वीयं परं जहि त्यज स्वस्थानं प्राप्य तेषां कुले गृहे वा त्वं स
र्वदा तिष्ठेत्यर्थ इति॥ भरा॥ एनेअहं ज मा ऽन जवी मत्यमन्ने सदाधिपो दुर्मरा अनमनानासः॥ आविध्येनी छेविषा

Indira Gandhi National
Centre for the Arts

विध्यतंतूंत्वैवस्वस्येते सदनंयमस्य॥इति॥४२॥अथानयाग्निं प्रतिकृत्याकारिणांप्रार्थयते। अतिगाल
१३ नपूर्वकं। हे अग्ने ये एते कृत्याकारिणः शत्रवः अनृजवः अतिकुटिलाः सदाधियः सदा सर्वदा मदीयं वध
मेवुध्यायंतीतेसदाधियः सदा मदीयवधध्यातारः दुर्मदाः दुर्मदाः दुष्टमदाः अतिदुष्टाभिमानवंतः अनग्नना
सः नविद्यंते अग्राणि यासां ताः अनग्नाः अग्ररहिताः छिन्नाग्ना इत्यर्थः। ईदृश्यो नासा नासिका येषां ते अनग्न
नासः छिन्नाग्रनासिका इत्यर्थः॥सुपांसुलुगित्यादिना जसः स्थाने सुः॥ ते अंजसा साकल्येन मत्युंजह आजघुः
हतवंतः एतान् शत्रून् शोचिषा तेजसा आविध्यमस्मसात्कृत्वा नदनुतंतून्स्तत्र तंतूनिव अतिक्षीणान् एषां
संबंधिनः आविध्यभस्मसान् कृत्वा नदनु वैवस्वतस्य वैवस्वतस्य विवस्वतः सूर्यस्यापत्यं वैव तः तस्य
ऋ वैवस्वतस्य सूर्यपुत्रस्य ईदृस्य यमस्य सदनं गृहं प्रेषयेति शेष इति॥४३॥ये नो रयिं दुश्चरितासो अग्ने जर्दुर्म ए.म.
र्त्यासो अनृतं वदंतः॥ तेषां व पूंष्यर्चिषा जातवेदः शुष्कं न हस्ममभिसंदहस्व॥इति॥४४॥अनयापि अग्निंप्र १२

तिकृत्याकारिणां प्रार्थयते। अतिगालनपूर्वकं॥ हे अग्ने ये कृत्याकारिणः दुश्चरितासः दुश्चरिताः दुश्चरिताः दु
श्चरित्राः सः मर्त्याः मरणधर्मिणः अतिनिकटमरणोपेताः अ नृतं वदंतः असत्यं वदंतः अतएव दुश्चरिता
सः अतएव मर्त्यासः ये कृत्याकारिणः शत्रवो ऽस्मारेकं रयिं धनं जहुर्दहनवतः तेषां व पूंषि शरीराणि हे जातवेदः जा
तानां प्राणिनां वेदयितः हे अग्ने अर्चिषा स्वतेजसा अभिसंदहस्व अभिमुखी भूय सम्यक् प्रकारेण भस्मसात्कु
रु। कमिव शुष्कं हस्मं न शुष्कं हस्ममिव यथा शुष्कं हस्मं अनायासेनैवाग्निर्दहति नकार उपमार्थीयो ज्ञेयः दुर्म
र्त्यासो नसुरामित्कूपमार्थीय उपरिष्टादुपचारस्तस्य येनोपमीयत इति यास्क इति॥४४॥कृष्णवर्णे महद्रूपे हृत्क
र्णे भयंकरि॥ देवि देवि महादेवि मम शत्रुर्विनश्यतु॥४५॥ हे कृष्णवर्णे अतिश्यामवर्णे महद्रूपे अतिदीर्घातिस्थू
लरूपे हे हृत्कर्णे अतिप्रतिलंबकर्णे अतएव भयंकरदर्शनमात्रादेव अतिभयोत्पादयित्रि देवि देवि महादेवि आ
दरातिशययोतनार्थं त्रीण्यपीमानि विशेषणानि। इत्थंभूते हे कृत्ये तव प्रसादान्मम शत्रुर्विनश्यतु इति॥४५॥कुवेर

२४ ते मुखं रौद्रं नंदिन्नानंदमावह॥ ज्वरं मत्स्यभयं घोरं विशन्नाशय मे ज्वरं॥ इति॥४६॥ हे कुबेर कुंदपुष्पैर्वा वि
भर्ति धारयति पालयती भूतरहितः स्वामी दिक्पालः तस्य संबोधनं हे कुबेर दिक्पालम् हे रुद्र सखते तव
मुखं रौद्रं रुद्र एव देवता यस्य तद्रौद्रं सर्वदा रुद्रनामोच्चारकं यथा तस्य संचारं परित्यज्य यत स्वं रुद्रसखो
सि इति कुबेर रुद्रस्य स्वं मत्स्यकामहादेवगणं नंदिनं प्रसाद्य हे नंदिन् नंदयति ज्वरादि निरसनेन लोकान्
तच्छीलो नंदीन तस्य संबोधनं हे नंदिन् महादेवस्य मुख्यगण त्वं आनंदमावह अस्मान् आनंदं प्रापय ज्वरादि नि
रसनेन यद्वा नंदिशब्देन कुबेर एवोच्यते आनंदयति आनंदयति महादेवप्रसादात् ज्वरादि निरसनेन धनादि
दानेन वा लोकानानंदयति तच्छीलो नंदी तस्य संबोधनं हे नंदिन् महादेवप्रसादात् ज्वरादि निरसनेन धनादिदानेन वा लोकाना
मानंदयितः हे कुबेर आनंदमावह प्रापय कथमानंदं प्रापयितव्य इत्यत आह घोरं अतिक्रूरं अतिसंतापज राः २४
नकं मत्स्यभयं मत्सो भयं यस्मात् स मत्स्य भयः तं मत्स्यभयं मत्स्यभयजनकं इत्थंभूतं ज्वरं विशन्प्रविशन्प्रविशन्

देहवासिन् ज्वरे इत्यर्थः॥ ज्वरे प्रविश्य किं कर्तव्यमित्यत आह॥ मे मम हत्वा जनितं ज्वरं नाशय॥ स्पष्टं कुबेरस्यैव
कस्यचित्परस्य कुस्यके स्वर इत्यपर इति॥४६॥ अथ ब्रह्मद्विषो जहि॥४७॥ हे उग्र कुल्येत्वं ब्रह्मद्विषः ब्रह्म दे द्वेषन्पा
पात्मनो जहि यशो धर्म धनाद्यपहारेण अतिनीचैर्स्थान् कृत्वा मारय वा यमन परधा अतो नो स्मान वा अनप
राधान्स्वयान स्पष्ट्याद्यतिभावः॥४८॥ अर्थानिमः हत्वा उत्पादनमंत्राः॥ फट् फट् जहि महाकृत्ये विधूमाग्निसम
प्रभे॥ जहि शत्रूं त्रिशूलेन कृष्णस्य पिबशोणितं इति॥४९॥ विधूमाग्निसमप्रभे विगतो धूमो यस्मात् सो विधूमः
विधूमश्चासावग्निश्च विधूमाग्निः विधूमाग्निना समा तुल्या प्रभा दीप्तिर्यस्याः सा विधूमाग्निसमप्रभा तस्याः संबोधनं हे
विधूमाग्निसमप्रभे धूमलेशरहितानि ज्वलितांगारं रूपाग्नितुल्यदीप्ते हे कृत्ये त्वं त्रिशूलेन हत्वा शत्रून् अस्मद
यान् शत्रून् हत्वाकारिणो जहि मारय आदरातिशयद्योतनार्थं पुनस्तदेवाह फट् फट् धिक् कृत्य धिक्कृत्य जहि मा
रय त्रिशूलेन कृत्ये वपि शत्रु देहे महाकृत्ये कृष्णस्य क्रोधं कृत्वा ते यां शोणितं रुधिरं पिब इति॥४९॥ इति पिष्टकृदि

Indira Gandhi N[illegible]ional
Centre fo[illegible] Arts

गोरवीयंयांकल्पयंतीतिसूक्तमष्टचतुस्त्रिंशदृगात्मकंव्याख्यातं॥श्रीररक्त॥इतिश्रीश्रीपतिकपतिकनिष्ठतनयवासु

१५ देवविरचितायां॥कृत्यानिर्हरणसूक्तगणव्याख्यायांवालबोधविवेकिन्यांपिप्पलादशाखीयमष्टाचत्वारिंशदृगा

त्मकंयांकल्पयंतीतिसूक्तंव्याख्यातं॥इतिश्रीद्विवेदश्रीश्रीपतिकनिष्ठतनयवासुदेवद्विवेदविरचितायांकृत्यानिर्हर

णसूक्तगणव्याख्यायांवालबोधविवेकिन्यांशौनकपैप्पलादोभयशाखीयसकलकृत्यानिर्हरणसूक्तगणव्या

ख्यानंसमाप्तम्॥श्रीराम॥ ॥श्रीरामः॥ ॥छ॥ रामः॥ राम॥ राम॥ रामः॥ ॥छ॥ रामः॥छ॥



Indira Gandhi National Centre for the Arts